एक-द्वि-युष्मद्-अस्मद्-भवत्-किम्” इत्युक्तवान् । यथा शाकुन्तले ४ अङ्के । “विश्रान्तेन भवता ममाप्येकस्मिन् कर्म्मणि सहायेन भवितव्यम्” । पुं, स्वनामख्यात ऐलवंशीयो नृपतिभेदः ।
यथा, भागवते ९।१५।२।
‘श्रुतायोर्वसुमान् पुत्त्रः सत्यायोश्च श्रुतं जयः ।
रयस्य सुत एकश्च जयस्य तनयोऽमितः’ ॥
परमेश्वरः । विष्णुः । यथा विष्णुसंहितायाम् । “एको नैकः सवः कः किम्” । “परमार्थतः सजातीयविजातीयस्वगतभेदराहित्यादेकः” । इति भाष्यम् । घटे घटान्तरात् भेदः सजातीयभेदः । घटे पटात् भेदः विजातीयभेदः । घटे कपालादेर्भेदः स्वगतभेदः ॥)

एककः त्रि, (“एकादाकिनिचासहाये” । ५।३। ५२। इत्यत्र चकारात् पक्षे कन् ।) असहायः । एकला इति भाषा । तत्पर्य्यायः । एकः २ एकाकी ३ । इत्यमरः ॥
(“महानप्येकको वृक्षः सर्व्वतः सुप्रतिष्ठितः ।
प्रसह्यैव हि वातेन शक्यो धर्षयितुं यतः” ॥
इति पञ्चतन्त्रे ३।५२ । । तथा नैषधे । २ । ३६ ।
“विधिरेकैकचक्रचारिणम्
किमु निर्म्मित्सति मान्मथं रथम्” ॥)

एककुण्डलः पुं, (एकं कुण्डलं यस्य ।) बलरामः । कुवेरः । इति मेदिनी ॥

एकगुरुः, पुं, (एको गुरुर्यस्य ।) सतीर्थः । इत्यमरः ॥ एकगुरुर शिष्य इति भाषा ॥

एकचक्रा, स्त्री, (एकं चक्रं यस्य ।) पुरीविशेषः । तत्पर्य्यायः । हरिगृहम्२ शुम्भपुरी३ । इति त्रिकाण्डशेषः ॥ सूर्य्यरथः । त्रि, असहायचारी । यथा, ऋग्वेदे १ । १६४ । २ ।
“सप्त युञ्जन्ति रथमेकचक्र-
मेकोऽश्वो वहति सप्तनामा ।
त्रिनाभिचक्रमजरमनर्व्वं
यत्रेमा विश्वा भुवनाधितस्थुः” ॥
अत्र भाष्यकृता यद्व्याख्यातन्तदाह ।
“एकचक्रमेकरथाङ्गोपेतम् । यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते रथं रंहणस्वभावं सूर्य्यस्य सम्बन्धिनं सप्तेतत्संज्ञका अश्वा युञ्जन्ति अनुबध्नन्ति वहन्त्यहोरात्रनिर्वाहाय । किं वस्तुतः सप्त नेत्याह । एकोऽश्वः सप्तनामा । एक एव सप्ताभिधानः सप्तधा नमनप्रकारो वा एक एव वायुः सप्तरूपं धृत्वा वहतीत्यर्थः । वाय्वधीनत्वादन्तरीक्षसञ्चारस्य एकचक्रमित्युक्तम् । कीदृशन्तदित्यत आह । त्रिनाभि बलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम् । अजरमजरणधर्म्माकम् । अनर्व्वमशिथिलं पुनस्तदेव विशेष्यते । यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि प्रसिद्धानि सर्व्वाणि भूतजातान्यधि आश्रित्य तस्थुस्तिष्ठन्ति । यद्वा एकचक्रमेकचारिणमसाहाय्येन सञ्चरन्तं रथमादित्यं सप्त युञ्जन्ति सर्पणस्वभावाः सप्तसंख्या वा रश्मयः सप्तप्रकारकार्य्या असाधारणाः परस्परविलक्षणाः षड़ृतवः एकः साधारण इत्येवंरूपा यद्वा मासद्वयात्मकाः षट् अपरोऽधिमासात्मक एक इत्येवं सप्तर्त्तवो युञ्जन्ति एतस्य कार्य्यं निर्व्वहन्तीत्यर्थः । स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्तरसानां सन्नमयितारो रश्मयो यस्य तादृशः । सप्तर्षिभिः स्तूयमानो वादित्यो वहति धारयति भ्रमतीत्यर्थः । किं भूतम् । त्रिनाभि चक्रम् । त्रयो नाभिस्थानीयाः सन्ध्यासम्बद्धा वा एव ऋतवो यस्य तत्तादृशम् । के ते ग्रीष्मवर्षाहिमन्ताख्याः यद्वा भूतभविष्यद्वर्त्तमानाख्यास्त्रयः कालास्त्रिनाभयः । तद्विशिष्टं चक्रं चक्रवत् पुनः पुनः परिभ्रममाणं संवत्सराख्यचक्रमजरमजरणम् । न हि कदाचिदपि कालो म्रियते अनादिनिधनः कालः इति स्मृतेः । अनर्व्वमप्रतिहतम् । ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनः पुनरावर्त्तयति संवत्सरादर्व्वाचीनानां तत्रैवान्तर्भावात् युगादीनां तदावृत्तिसाध्यात् संवत्सरस्य चक्रत्वेन रूपणम् । पुनः कीदृशं तत् । यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि सर्व्वाणि भूतान्यधितस्थुः आश्रित्य तिष्ठन्ति कालाधीनत्वात् सर्व्वस्याः स्थितेः । ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षाक्षरप्रशंसा च” ॥ नृपादयविशिष्टम् । एकराजविशिष्टम् । यथा, भागवते ।३।१।२०।
“इत्थं व्रजन् भारतमेव वर्षं
कालेन यावत् गतवान् प्रभासम् ।
तावच्छशास क्षितिमेकचक्रा-
मेकातपत्रामजितेन पार्थः” ॥
पुं, असुरभेदः । यथा, हरिवंशे ३ । ८४ ।
“एकचक्रो महावाहुस्तारकश्च महाबलः” ।
अयं हि प्रतिविन्ध्य इति नाम्ना प्रसिद्धः । यथा । महाभारते १ । सम्भवपर्व्वण्यंशावतरणे ६७ । २२ ।
“एकचक्र इति ख्यात आसीद्यस्तु महासुरः ।
प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ” ॥
स्त्री, स्वनामख्याता पुरी । अत्रस्थो भीमसेनो महाबलं वकनामानमसुरं हतवान् ॥ यथा,— महाभारते । १ । अंशावतारपर्व्वणि भारतसूत्रे । ६१ । २६-२८ ।
“ते तत्र नियता कालम् कञ्चिदूषुर्नरर्षभाः ।
मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने ॥
तत्रासमाद क्षुधितं पुरुषादं वृकोदरः ।
भीमसेनो महावाहुर्व्वकं नाम महाबलम् ॥
तत्रापि पुरुषव्याघ्रो बाहुवीर्य्येण पाण्डवः ।
निहत्य तरसा वीरो नागरान् पर्य्यसान्त्वयत्” ॥)

एकचरः, पुं, (एकश्चरति यः । चर + पचाद्यच् ।) हिंस्रपशुविशेषः । गण्डार इति भाषा । तत्पर्य्यायः । वार्द्धीनसः २ गणोत्साहः ३ गण्डकः ४ । इति त्रिकाण्डशेषः ॥
(सर्पादिः । यथा, मनुः । ५ । १७ ।
“न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान्” ।
“ये एकाकिनः प्रायेण चरन्ति सर्पादयस्तानेकचरान्” । इति तट्टीकायां कुल्लूकभट्टः ॥ (त्रि, एकाकिचारी । यूथभ्रष्टः । यथा, “अयमेकचरोऽभिवर्त्तते माम्” । इति किराते । १३ । ३ ।
“एकचरो यूथादपेतः” । इति तट्टीका ॥)

एकचारी, [न्] पुं, (एकः सन् चरतीति । चर + णिनि ।) बुद्धसहचारी । इति त्रिकाण्डशेषः ॥ (एकचारिणि, त्रि ॥)

एकजटा, स्त्री, (एका जटा यस्याः ।
“एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका’ ।
इति श्रवणात् । यद्वा एका मुख्या जटा यस्याः ।
“खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्” ।
इति च श्रवणात्तथात्वम् ।) उग्रतारा । तस्या आविर्भावो यथा,—
“सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम् ।
गङ्गावतारनिकटे महामायां प्रतुष्टुवुः ॥
अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः ।
मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत ॥
युष्माभिरमरैरत्र स्तूयते का च भाविनी ।
किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति ॥
एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः ।
समुद्भूताब्रवीद्देवी मां स्तुवन्ति सुरा इति ॥
शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान् ।
तस्मात्तयोर्वधायाहं स्तूयेऽद्य सकलैः सुरैः ॥
विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा ।
भिन्नाञ्जननिभा कृष्णा साभूत् गौरी क्षणादपि ॥
कालिकाख्याभवत् सापि हिमाचलकृताश्रया ।
तामुग्रतारामृषयो वदन्तीह मनीषिणः ॥
उग्रादपि भयात् त्राति यस्माद्भक्तान् सदाम्बिका ।
एतस्याः प्रथमं वीजं कथितं तन्त्रमेव च ।
एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका ।
पूरणं चिन्तनं चास्याः सम्यक् वेतालभैरवौ ।
यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् ।
चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् ॥
खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः ।
कर्त्रीञ्च खर्परञ्चैव क्रमादामेन बिभ्रतीम् ॥
खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम् ।
मुण्डमालाधरां शीर्षे ग्रीवायामपि सर्व्वदा ॥
वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् ।
कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम् ॥
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् ।
विन्यस्य सिंहपृष्ठे तु लेलिहानासवं स्वयम् ॥
साट्टहासमहाघोरा रावयुक्तातिभीषणा ।
चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः ॥
एतस्याः संप्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः ।
महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च ॥
घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी ।
भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्” ॥
इति कालिकापुराणे ६१ अध्यायः ॥

एकजन्मा, [न्] पुं, (एकं मुख्यं जन्म यस्य । दिक्पालांशसम्भूतत्वादस्य तथात्वम् ।) राजा । इति त्रिकाण्डशेषः ॥ (एकं न द्वितीयं जन्म यस्य इत्यर्थे । शूद्रः । तस्य अद्विजत्वात् तथात्वम् ।)